अस्मिन्नेव सूत्रे सकारादेशो वा निर्दिश्यते, 'समः सुटि' इति द्विसकारको[1] निर्देशः। समः इति किम्? उपस्कर्ता। सुटि इति किम्? [2]संकृतिः[3]। कश्चिदाह –

[९३६] संपुंकानां [4]सो वक्तव्यः। (म. भा. ३.४२४)

[5]रुविधौ ह्यनिष्टप्रसङ्गः, संस्स्कर्ता, पुंस्स्कामा[6], कांस्स्कान्[7] इति॥

## पुमः खय्यम्परे। (६/१३९)

पुम् इत्येतस्य रुः भवति अम्परे खयि परतः। पुँस्कामा, पुंस्कामा। पुँस्पुत्रः, पुंस्पुत्रः। [8]पुँस्फलम्, पुंस्फलम्। पुँश्चली, पुंश्चली। [9]पुंस्कामा इत्यत्र विसर्जनीयस्य 'कुप्वोः ≍क ≍पौ च' (८.३.३७/१४२) इति प्राप्नोति। तस्मादत्र सकार एवादेशो वक्तव्यः। द्विसकारकनिर्देशपक्षे तु पूर्वस्मादेव सूत्रात् सः इत्यनुवर्तते। रुत्वम् तु अनुवर्तमानमपि [10]नात्राभिसम्बध्यते, सम्बन्धानुवृत्तिस्तस्य इति। खयि इति किम्? पुंदासः। पुंगवः[11]। अम्परे इति किम्? [12]पुंक्षीरम्। पुंक्षुरम्। परग्रहणं किम्? [13]पुमाख्यः। पुमाचारः॥

## नश्छव्यप्रशान्। (७/१४०)

[14]अम्परे इति वर्तते। [15]नकारान्तस्य पदस्य [16]प्रशान्वर्जितस्य रुः भवति अम्परे छवि परतः। भवाँश्छादयति, भवांश्छादयति। भवाँश्चिनोति, भवांश्चिनोति; भवाँष्टीकते, भवांष्टीकते। भवाँस्तरति, भवांस्तरति। छवि इति किम्? भवान् करोति। अप्रशान् इति किम्? प्रशान् छादयति। प्रशान् चिनोति। अम्परे इत्येव, भवान्त्सरुकः[17]॥

## उभयथर्क्षु। (८/३६३०)

पूर्वेण नित्ये प्राप्ते विकल्पः क्रियते। नकारान्तस्य पदस्य छवि परतः अम्परे उभयथा [18]ऋक्षु भवति, रुर्वा नकारो वा। तस्मिंस्त्वा दधाति, तस्मिन् त्वा दधाति। ऋक्षु इति किम्? '[19]ताँस्त्वं खाद सुखादितान्' (वा. सं. ११.७८)॥

## दीर्घादटि समानपादे। (९/३६३१)

नः इत्यनुवर्तते। दीर्घादुत्तरस्य पदान्तस्य नकारस्य रुः भवति अटि परतः, [20]तौ चेन् निमित्तनिमित्तिनौ [21]समानपादे भवतः। ऋक्षु इति [22]प्रकृतत्वाद् ऋक्पादः इह गृह्यते। 'परिधींरति' (ऋ. ९.१०७.१९)। '[23]देवाँ अच्छा दीद्यत्' (ऋ. ३.१.१) 'महाँ इन्द्रो य ओजसा' (ऋ. ८.६.१)।[24] दीर्घात् इति किम्? 'अहन्नहिम्' (ऋ. १.३२.१)। अटि इति किम्? इभ्यान् क्षत्रियान्। समानपादे इति किम्? [25]यातुधानान्[26]पस्पृशः। उभयथा इत्येव, आदित्यान् (ऋ. ८.६७.१.) हवामहे॥

---

1. अयं इत्यधिकम् ब. क. 2. संहरति क. 3. संप्लुतिः संभवति इत्यधिकम् ब. 4. रुवचनं ब. 5. विसर्जनीयस्य प्रसङ्गे इति क. 6–7. आमन्त्रयते इत्यधिकम् क. 8. पुंस्कम्बलः पुँस्कम्बलः ड. 9. पुंस्कामा – खयि नास्ति क. 10. नाभिसम्बध्यते ह. 11. पुम्भावः इत्यधिकम् क. 12. पुंक्षारः क, पुंक्षुरः ह. 13 पुमाख्युः ब. 14. वाक्यमिदं नास्ति ब. 15. नकारस्य ब. 16. प्रशान्शब्दवर्जितस्य ड. 17. पदस्य इति किम्? हन्ति इत्यधिकम् क. 18. ऋग्विषये इ, ऋग्विषये प्रयोगे ब. क. 19. तान् इत्यधिकम् क. 20. स चेत् रुः नकारश्च इ. 21. समानपादस्थौ ब. ड. 22. अधिकारात् इ. 23. भवाँ अच्छा दीद्यत् इ. ह. 24. महाँ असि इत्यधिकम् ब. क, महाँ हि सः इत्यधिकम् ड. ह. 25. अर्चिषा इत्यधिकम् इ. 26. उपस्पृशत् ड.